
# चतुर्दशः पाठः

# प्रतिपदं संस्कृतम् ।

संस्कृतभाषा भारतस्य ज्ञानभाषा वर्तते । संस्कृते विद्यमानं ज्ञानं कालातीतम् अद्यापि सुसङ्गतं च । 'किमर्थं संस्कृतम् ?' 'कः लाभः संस्कृतपठनेन मम ?' 'विद्यालयोत्तरमपि अस्ति वा संस्कृताध्ययनस्य अवसरः ?' 'अपि संस्कृताध्ययनेन अहं वृत्तिं लभेय ?' इति बहवः प्रश्नाः छात्रजीवने अस्मान् सन्त्रासयन्ति । संस्कृताध्ययनेन युगानुकूला वृत्तिः तु लभ्यते एव अपि तु यस्मिन् क्षेत्रे वयं कार्यरताः तत्र अस्माकं गुणवत्ता अपि वर्धते । तदर्थं संस्कृतम् अवश्यम् अध्येतव्यम् । यः संस्कृतं सम्यक् जानाति स एव यथार्थतया तस्य सर्वेषु क्षेत्रेषु उपयोजनं कर्तुं शक्नोति ।







(संवादस्थलम् – विमानतलस्य प्रतीक्षालयः ।) केचन जनाः यात्रायाः आरम्भार्थं प्रतीक्षन्ते । केचन सुखेन निद्रामग्नाः । केचन कॉफिपानस्य आनन्दम् अनुभवन्ति । तत्र एका महोदया प्राप्नोति । सा उपविश्य किमपि पुस्तकं पठितुं प्रारभते । पुस्तकस्य मुखपृष्ठे संस्कृत–सूक्ति–सङ्ग्रहः इति शीर्षकं वर्तते । तत् दृष्ट्वा समीपस्थः कोऽपि महाजनः तया सह वक्तुं प्रारभते ।

महोदयः – अपि भवती संस्कृतं पाठयति ?

महोदया – (सस्मितं) न खलु ।

महोदयः – भवत्याः समीपे एतं सुभाषितसङ्ग्रहं दृष्ट्वा मया एवं चिन्तितम् ।

महोदया – ओह् ! यद्यपि संस्कृतं न पाठयामि तथापि अस्य पुस्तकस्य मम कार्यक्षेत्रेण सह सम्बन्धः अस्ति।

महोदयः – एवम् । कस्मिन् क्षेत्रे कार्यरता भवती ?

महोदया – अहं व्यवस्थापनप्रशिक्षिकारूपेण कार्यं करोमि। मया अवगतं यद् रामायण–महाभारत–किरातार्जुनीय–रघुवंश–इत्यादिषु बहवः श्लोकाः सन्ति येषु व्यवस्थापनशास्त्रस्य मूलतत्त्वानि दृष्टान्तसहितानि निर्दिष्टानि । अनेन काव्यमाध्यमेन विषयप्रवेशः सुगमः भवति । एषा पद्धतिः मया स्वीकृता जनैरपि अभिमता । अतः मया पुनरेकवारं संस्कृतभाषायाः संस्कृतकाव्यादीनां च अध्ययनं प्रारब्धम्।

महोदयः – अहो आश्चर्यम्! शालायाः अनन्तरं खण्डितं मम संस्कृताध्ययनम् । तदपि अधुनैव पुनः आरब्धम् ।

महोदया – कथं कथम् ?

महोदयः – वस्तुतः अहं वाणिज्यशाखायाः स्नातकः । विधिशाखायाः पदवी अपि प्राप्ता मया । साम्प्रतं बहुराष्ट्रियसंस्थायां विधिविमर्शकरूपेण कार्यं करोमि । तदनुसृत्य कौटिलीयम् अर्थशास्त्रं, याज्ञवल्क्यस्मृतिः इत्यादीनां ग्रन्थानाम् अध्ययनं साहाय्यकरं भवेत् इति गुरुभिः उक्तम् । अतः अधुना अहं शास्त्रविषयकाणां संस्कृतग्रन्थानाम् अध्ययने यत्नं करोमि । (स्यूतात् किमपि संस्कृतपुस्तकं दर्शयति ।)

(तयोः पृष्ठतः केचन युवकाः गोष्ठिषु रताः । प्रसादः, समीरः, लीना तथा तनुजा इत्येतानि परस्परमित्राणि। तेषु अन्यतमः तत् पुस्तकं दृष्ट्वा महोदयम् उपगम्य वदति ।)

समीरः – महोदय, भवतोः संवादे संस्कृतस्य सन्दर्भः श्रुतः मया । भवानपि विश्वसंस्कृतपरिषन्निमित्तं विदेशं प्रस्थितः ?

महोदयः – न खलु । परं कीदृशी एषा विश्वसंस्कृतपरिषद्? अपि भवान् संस्कृतस्य छात्रः ?

समीरः – आम् । अहम् आय. आय. टी. अर्थात् भारतीय–प्रौद्योगिकी–संस्थानम् इत्यत्र सङ्गणक – अभियान्त्रिकी इति विषयस्य छात्रः । तत्र छात्राः संस्कृतमपि पठितुं शक्नुवन्ति । अष्टाध्यायी इति व्याकरणशास्त्रविषयकः ग्रन्थः पाठ्यते तत्र मानव्यविद्याविभागे । अहं संस्कृतव्याकरणं सङ्गणकशास्त्रं च इति विषयम् अधिकृत्य संशोधनं करोमि। तद्विषयकं शोधनिबन्धं प्रस्तोतुम् अहं परिषदि निमन्त्रितः।

महोदया – अहो आश्चर्यम्! तन्त्रज्ञानसंस्थायाम्? संस्कृतस्य अध्ययनम् ?

महोदयः – महाविद्यालये संस्कृताध्ययनं केवलं कलाशाखायाः छात्राः कुर्वन्ति इत्यासीत् मे मतिः ।

समीरः – तिष्ठतु तावत् । तर्हि अवश्यं मेलयामि मे मित्राणि । एते सर्वेऽपि परिषदि सहभागिनः ।

प्रसादः – (अग्रे आगत्य) नमस्ते । अहं रसायनशास्त्रस्य छात्रः । प्राचीनभारतीयरसायनशास्त्रम् इति मम संशोधनक्षेत्रम् । तद्विषयकाः ग्रन्थाः संस्कृतभाषया लिखिताः । शालायां यद् संस्कृताध्ययनं कृतं तस्य उपयुक्तताम् अहम् अधुना अवगच्छामि ।

लीना – अहमपि भाषाशास्त्रम् अधीत्य बेङ्गलुरू इत्यत्र सॉफ्टवेअर–क्षेत्रे भारतीयभाषाविश्लेषिकारूपेण कार्यं करोमि । संस्कृतस्य ज्ञानम् आधुनिकभारतीय–भाषाणां विश्लेषणे अतीव साहाय्यकरं भवति इति मे अनुभवः ।

तनुजा – पार्श्वनिवेदनम् इति मे व्यवसायः । संस्कृतश्लोकादीनां पठनेन शब्दोच्चारणस्य उत्तमः अभ्यासः भवति। तेन अभिनये निवेदने च प्रभावः वर्धते । साम्प्रतं कलाक्षेत्रे कार्यरताः अस्मासु केचन भरतमुनेः नाट्यशास्त्रस्य अध्ययनं कुर्वन्ति ।

समीरः – भोः, भारतीयविद्यायाः नाम भारतीयतत्त्वज्ञान–योगशास्त्र–इतिहास– स्थापत्यादिशास्त्राणाम् अध्ययनाय विदेशेष्वपि नैके जनाः उत्सुकाः । तदर्थं काश्चन दूरचित्रवाहिन्यः अपि सन्ति । तत्र संस्कृतज्ञानाम् आवश्यकता वर्तते । मम सुहृद् आशयसम्पादकरूपेण तत्र कार्यरतः ।

महोदया – अस्माभिः संस्कृतस्य अध्ययनं शालायां कृतम् । परं तस्य अनेन प्रकारेण उपयोजनं भवेदिति अस्माभिः नैव चिन्तितम् ।

महोदयः – सत्यमेव ।

लीना – यस्मिन् कस्मिन्नपि क्षेत्रे वयं वृत्त्यर्थं कार्यरताः स्याम, तत्र संस्कृतज्ञानम् अस्मत्कृते विशेषार्हता भवति ।

## भाषाभ्यासः



### १. पूर्णवाक्येन उत्तरत ।

अ) महोदया किं कार्यं करोति ?

आ) केन माध्यमेन विषयप्रवेशः सुगमः भवति ?

इ) व्याकरणशास्त्रविषयकग्रन्थस्य नाम किम् ?

ई) समीरः किम् अधिकृत्य संशोधनं करोति ?

उ) प्रसादस्य संशोधनक्षेत्रं किम् ?

ऊ) तनुजायाः व्यवसायः कः ?

ए) शब्दोच्चारणस्य अभ्यासः केन भवति ?

### २. माध्यमभाषया उत्तरत ।

अ) संस्कृताध्ययनम् अन्यक्षेत्रेषु कथम् उपयुक्तम् ?

### ३. प्रश्ननिर्माणं कुरुत ।

अ) श्लोकेषु व्यवस्थापनशास्त्रस्य मूलतत्त्वानि निर्दिष्टानि ।

आ) पदवी मया प्राप्ता ।

इ) प्रसादेन संस्कृतस्य अध्ययनं शालायां कृतम् ।

ई) समीरः परिषदि निमन्त्रितः ।

उ) संस्कृताध्ययनं कलाशाखायाः छात्राः कुर्वन्ति ।

### ४. समानार्थकशब्दं मेलयत ।

अ) संशोधनम्, अवगतम्, सुगमः, भाषा

आ) ज्ञातम्, सुलभः, अनुसन्धानम्, भारती

### ५. विरुद्धार्थकशब्दान् लिखत ।

मित्राणि, उत्सुकाः, विदेशः

### ६. सन्धिविग्रहं कुरुत ।

(अ) जनैरपि (आ) अधुनैव (इ) सर्वेऽपि

(ई) विदेशेष्वपि (उ) कस्मिन्नपि

### ७. मेलनं कुरुत ।

| विशेषणम् | विशेष्यम् |
|---|---|
| बहवः | ग्रन्थान् |
| सुगमः | जनाः |
| एका | ज्ञानम् |
| शास्त्रविषयकान् | अभ्यासः |
| साहाय्यकरम् | महिला |
| उत्तमः | विषयप्रवेशः |
| उत्सुकाः | श्लोकाः |

### ८. सूचनानुसारं कृतीः कुरुत ।

अ) अहं वाणिज्यशाखायाः स्नातकः । (बहुवचने परिवर्तयत ।)

आ) अहम् अध्ययने यत्नं करोमि । (वाक्यं विधिलिङ्लकारे परिवर्तयत ।)

इ) सः महोदयम् उपगम्य वदति । (पूर्वकालवाचकं निष्कास्य वाक्यं लिखत ।)

ई) अपि भवती संस्कृतं पाठयति? ('भवती' स्थाने 'त्वं' योजयत ।)

उ) पदवी अपि प्राप्ता मया । (प्रयोगपरिवर्तनं कुरुत ।)

ए) छात्राः संस्कृतमपि पठितुं शक्नुवन्ति । (एकवचने परिवर्तयत ।)

ऐ) वयं कार्यरताः स्याम । (लोट्-लकारे परिवर्तयत ।)

## ९) धातुसाधित-विशेषण-तालिकां पूरयत ।

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| प्रच्छ्-पृच्छ् (६ प.प.) | ______ | पृष्टवान् | ______ | पृच्छन् |
| रम् (१ आ.प.) | रतः | ______ | रन्तव्यः | ______ |
| कृ (८ उ.प.) | ______ | ______ | कार्यः | कुर्वाणः |

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| आ+रुह्-रोह् (१ प.प.) | ______ | आरूढवान् | ______ | आरोहन् |
| लिख् (६ प.प.) | लिखितः | ______ | लेखितव्यः | ______ |
| सेव् (१ आ.प.) | सेवितः | सेवितवान् | ______ | ______ |

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| रभ्(१ आ.प.) | रब्धः | ______ | ______ | रभमाणः |
| मुच्-मुञ्च् (६ उ.प.) | ______ | ______ | मोचनीयः | मुञ्चन् |
| ज्ञा (९ उ.प.) | ज्ञातः | ज्ञातवान् | ______ | ______ |

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| पा-पिब् (१ प.प.) | ______ | ______ | पेयः | पिबन् |
| प्र+विश् (६ प.प.) | प्रविष्टः | ______ | ______ | प्रविशन् |
| वद् (१ प.प.) | ______ | उदितवान् | वदनीयः | ______ |

## १०. जालरेखाचित्रं पूरयत ।

अ)

संस्कृतग्रन्थाः

कौटिलीयम् अर्थशास्त्रम्

आ)

विदेशीयाः जनाः उत्सुकाः

______ अध्ययनाय

______ अध्ययनाय

______ अध्ययनाय

______ अध्ययनाय

## ११. तालिकां पूरयत ।

| विश्वसंस्कृतपरिषदि सहभागिनः जनाः | |
|---|---|
| समीरः | ______ |
| ______ | रसायनशास्त्रच्छात्रः |
| लीना | ______ |
| ______ | पार्श्वनिवेदिका |

756XDD